## पञ्चम्यामजातौ। (९८/३००८)

पञ्चम्यन्त उपपदे जातिवर्जिते [1]जनेर्डः प्रत्ययो भवति। [2]बुद्धिजः। संस्कारजः। [3]दुःखजः। अजातौ इति किम्? [4]हस्तिनो जातः। अश्वाज्जातः॥

## उपसर्गे च सञ्ज्ञायाम्। (९९/३००९)

उपसर्गे च उपपदे जनेः[5] डः प्रत्ययो भवति सञ्ज्ञायां [6]विषये। समुदायोपाधिः सञ्ज्ञा। अथेमा मानवीः प्रजाः॥

## अनौ कर्मणि। (१००/३०१०)

अनुपूर्वात् जनेः कर्मणि उपपदे डः प्रत्ययो भवति। पुमांसमनुजातः पुमनुजः। [7]स्त्र्यनुजः॥

## अन्येष्वपि दृश्यते। (१०१/३०११)

अन्येष्वपि उपपदेषु [8]कारकेषु जनेः डः प्रत्ययो [9]दृश्यते। सप्तम्याम् इत्युक्तमसप्तम्यामपि दृश्यते[10]। [11]न जायते इति अजः। [12]द्विर्जाताः द्विजाः। 'पञ्चम्यामजातौ' (३. २. ९८/३००८) इत्युक्तं, जातावपि दृश्यते। ब्राह्मणजो धर्मः। क्षत्रियजं युद्धम्। 'उपसर्गे च सञ्ज्ञायाम्' (३. २. ९९/३००९) इत्युक्तम्, असञ्ज्ञायामपि दृश्यते। अभिजाः[13], [14]परिजाः केशाः। 'अनौ कर्मणि' (३. २. १००/३०१०) इत्युक्तम्, अकर्मण्यपि दृश्यते। [15]अनुजातः अनुजः। [16]अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि भवति, [17]कारकान्तरेऽपि। परितः खाता परिखा। [18]आखा॥

## निष्ठा। (१०२/३०१३)

'क्तक्तवतू निष्ठा' (१. १. २६/३०१२) इत्युक्तं, स निष्ठासञ्ज्ञकः प्रत्ययो भूते भवति। [19]कृतम्। कृतवान्। [20]भुक्तम्। भुक्तवान्। निष्ठायाम् इतरेतराश्रयत्वादप्रसिद्धिः (म.भा. २.११३)। [21]सञ्ज्ञायां क्तक्तवतू भाव्येते, सतोश्चानयोः सञ्ज्ञया [22]भाव्यम्। नैष दोषः। [23]भाविनी सञ्ज्ञा विज्ञायते। स भूते भवति, यस्योत्पन्नस्य निष्ठा इत्येषा सञ्ज्ञा [24]भवति। सामर्थ्यात् क्तक्तवत्वोर्विधानमेतत्[25]।

[२६८] आदिकर्मणि निष्ठा वक्तव्या (म. भा. २.११३)।

प्रकृतः कटं देवदत्तः। प्रकृतवान् कटं देवदत्तः॥

---

1. जनेः धातोः ब. क. 2. बुद्धिजम् फ, बुद्धेः जातः इत्यधिकम् क. 3. दुःखजः नास्ति फ, स्वेदजं दुःखम् ब. क, सुखजः ड. 4. उदाहरणमिदं नास्ति फ. 5. धातोः इत्यधिकम् ब. ह. 6. इति फ. 7. स्त्रियमनु-जातः अ. क, स्त्र्यनुजः नास्ति ब. 8. कारकेषु नास्ति फ, कारकेषु च ड. ह. 9. भवति ड. ह. 10. इत्यर्थः इत्यधिकम् ब. 11. न जातः अजः ड.फ. 12. उदाहरणमिदं नास्ति फ. 13. केशाः इत्यधिकम् ब. 14. परिजाः नास्ति ब. 15. अनुजातः नास्ति फ. 16. अपिः अ. फ. 17. कारकान्तरेषु अ, कारकान्तरेऽपि च ब. ह. 18. आख्या अ. क, नास्ति फ. 19. कृतः ब. फ. 20. भूतः भूतवान् फ, भुक्तः ब. 21. सञ्ज्ञया ब. ड. 22. भवितव्यम् ब. क. फ. 23. भाविनि ब. 24. भवति इति ब. फ. ह, भविष्यति इति ड. 25. इदम् फ.